छन्दोमयी

डॉ. प्रकाश पांडे

डॉ. प्रकाश पांडे
डी. लिट्.
"अहल्या"
दत्त मंदिर समीप,
सोमलवाडा पश्चिम रोड,
नागपुरम् - २५.

—(नवप्रकाशनचक्रे)

छन्दोमयी

(अनूदिता)

❀

मूल मराठीकविः

डॉ. वि. वा. शिरवाडकरः 'कुसुमाग्रजः'

❀

अनुवादकः

डॉ. प्रकाश पाण्डे

एतत्कवितासङ्ग्रहस्थाः सर्वाः अपि कविताः
संस्कृत-भाषा-प्रचारि-सभया
संस्कृत-भवितव्यम् मध्ये प्रकाशिताः।
अतः सभायै आभाराः।

प्रकाशकः
डॉ. प्रकाश पांडे
(संस्कृत-भाषा-प्रचारि-सभायाः सौजन्येन)

@ सर्वेऽधिकाराः प्रकाशकाधीनाः

मूल्यम् ५० रु.

आवृत्तिः - प्रथमा १९९७

संगणकीय अक्षरयोगाः
एनबीटी एन्टरप्राईजेस
२५५ अ/२, दक्षिण-अंबाझरी-मार्गः,
लक्ष्मीनगरम्, नागपूरम् - ४४० ०२२.

छन्दोमयी-स्वरूपम्

समारभे समारम्भत एव। एवञ्च 'शितावरून भाताची परीक्षे'ति छन्दोमय्यां कुसुमाग्रजाः कथं नाम समवराजन्ते इति विशदं जायतात्।

छन्दोमय्यां ध्येयप्रवणत्वं लक्ष्यत एव। 'प्रगे-रक्तं गायन्ति' इत्यत्र 'रक्त'शब्दे श्लेषः। स्याद्वा मेऽनुवादकस्यैव, अथवा न वाऽपि। किन्तु छन्दोमयी एवास्मत्कृते 'संस्कृत-छन्दोमयी' जातास्त्यत एव ज्ञात्वाऽपि सर्वमपि कुसुमाग्रजीयं मूलछन्दोमयीमपि विस्मृत्य मम कृते, वाचकानां कृते च, 'मम' छन्दोमयीमर्पयामि, - विनयेनैव कृतज्ञतया च। यतो महाराष्ट्रीयमूलं नाम वरमेव। इदं च मूलम्, कोलम्बस (गर्व) - गीतं लिखतः मानवतावादिनो महाराष्ट्रीजनस्य, - यस्य क्रान्तिगीतानि द्वाचत्वारिंशत् (१९४२) तमे संवत्सरे तत्पूर्वतोऽपि क्वचित् क्वचित्, भारतीय-स्वातन्त्र्य-क्रान्तिवीराः, राजबन्दिनोऽपि 'कारागृहेऽपि' गायन्ति स्म। अस्यैव कुसुमाग्रजस्येयं 'छन्दोमयी', यत्र योद्धा तरुणिमा स्वातन्त्र्ययुद्धस्मृतीरावर्ज्जयन्, छन्दोमय्यां क्रान्तिविचारे एव, - स्वस्यैव चटको जायते मृत्योर्विजेता भवितुं समीहतेऽद्य ८५तमसंवत्सरीयः। तथाऽपि नेयं शोकान्तिका। कविकुसुमाग्रजो महानेव। न वदामः बहुवचने कविकुसुमाग्रजाः महान्त एव। यतः कुसुमाग्रजाः सत्यमेव महान्त एव लक्षलक्षाणां महाराष्ट्रियनानां प्रियतमाः एव, - यैः पञ्चाशीतिसंवत्सरेऽस्य विंशतितमशतकस्य ज्ञानपीठं-पुरस्कारोऽपि प्राप्तोऽस्ति स्व-कविता-रूपकादीनामुपन्यासानां कथासम्भाराणाञ्च जीवनयात्रायाम्। महानयं यात्रिकः। अत एवोक्तं मया यद्यत्रकुत्राऽपि वयं छन्छोमयीं प्रेक्षामहे, तत्र तत्रांशत्वेन ध्येयात्मतैव कुसुमाग्रजात्मा इति लक्ष्यते। एवञ्च तैरपि क्वचित्क्वचिदात्मैव स्तूयते श्रूयते च किन्तु क्षीणस्वरेणाधुना, इति लक्ष्यते। अत एव कांश्चन केवलमादिमा एव कविताः पश्यामः, येन शितावरून भाताचि परीक्षा जायत एव। कस्याऽपि ध्येयवादिनः क्षीणस्वरश्च श्रोतृपथमायास्यति।

एवं छन्दोमय्यां ध्येयप्रवणत्वं लक्ष्यत एव। किन्तु छन्दोमय्यां भव्यता, ... सहजता च लक्ष्यते। अन्ते च सहजतैव साहित्यसहवासत्वेन परिलभते । अत एव छन्दोमय्यां ध्येयात्मता, ध्येयांश-रूपेण इत्येवं प्रतीयते। उदाहरणानि शतशोऽपि दातुं शक्यमेतासु द्वयधिक-पञ्चाशत् कवितास्वपि। अत एव काश्चनादितमा एव कविताः पश्यामः।

'प्रगे-रक्ते-गायन्ति' इत्यत्र 'रक्त' शब्दे श्लेष इति दृष्टमेव। 'मरणस्य सीमोषरे' इत्यत्र ऊषरम्, सीमोषरम् वा भूमेर्निःसत्त्वतायाः, - अत एवैतस्यां शौर्य्यादिगुणानामावश्यकता प्रतीयते। विशदैव च जायते। 'मरणस्य सीमोषरे, उच्छृङ्खलं क्रीडन्तं माम्' - इत्यत्र मरणविषये 'विनिर्भीकता (शक्यं महाराष्ट्रीप्रयोगोऽयं संस्कृते समानीतः, येन 'महाराष्ट्री-संस्कृत शब्दोऽयमिति ज्ञातमस्तु विद्वद्भ्यः।') कवेरालक्ष्यत एव। 'सर्वेषामप्युडूनां भानं हि नैव जगति', - इत्यत्र 'अवसानमेव येषां नक्षत्रजालेमध्ये इत्यत्र च धार्मिक - आध्यात्मिको ऽर्थः, - अपर-वैश्विकोऽर्थः संलक्ष्यते। इदमपि शक्यमेव यदयमर्थो न विशदः, न वा सत्योऽपि। प्रज्ञा रयोमयी स्यात्,' - स्वरमेलनम्, इत्यादिषु कुसुमाग्रजानां सङ्गीतप्रियत्वं दृश्यते। 'सौदामिनी-नाराचानाम्' इत्यत्राऽपि किमपि कल्पनानाम्, आदानं प्रदानञ्च लक्ष्यत एव। अत्र कल्पनावैचित्र्यम्। 'वालुकानां रथ्याः', 'कर्पूरक्षोदेनाग्निसात् प्रासादः' 'सप्तस्वरेष्वितं क्वचित्, मम जीवनस्य गीतम्' इत्यत्र च पारम्पारिकी अभिजातता मूलमहाराष्ट्यामपि सं लक्ष्यते एव। मृत्युविषयिणी भावना, अभिजात-स्व-भार्या-स्मृतिश्च पश्यत 'अद्याऽपि' कवितायामपि। यथा -

'प्रालेयरथ्येयं शिशिरस्य
इदानीमागामिनि देशे
तवाश्लेषस्य जागर्ति
मधुरिम्णः स्मृतिरद्याऽपि'।

महाराष्ट्रीम् 'ऊषरभाषा'मपि पश्यत। तस्याश्च वैफल्यमपि।

'एवं हठस्य
एवं तटस्य

रे किमर्थम्,'

उरसि विधार्याः, व्यथा-त्रिशूलाः, तेषामप्युपरि ज्वलन्तः, व्रणाः - इत्यत्र पुनः शौर्यादि-प्रत्ययः। अयमेव व्रणाः देयाः/स्वीकरणीयाः/ रामायणन्तु किमर्थमेषाम् - इत्यत्राऽपि। 'मराठी बाणा'ऽपि नामाधुनात्वविसंगतः इत्याशयः। अग्निना किमर्थं धूम्रकीर्तनमित्यत्र वीरश्रीर्जन्यप्रियता च दृश्यत एव। यथा प्राचीन-महाराष्ट्रे। स्याद्वा हर्षसमये। अयमेतेषां नितान्तमाशावादी दृष्टिकोणः यः कथयति यदुदयाद्र्युपर्य्यपि लक्ष-श्वोदिन-उषाऽपि मन्दं जागर्ति खलु। अतश्च तरुणिम्न एव कृते,

'कृते तवैव
लक्षरवीणाम्
गर्भाः सुखेनैव
किमिति सहन्ते'।

प्रेमकवितास्वपि 'छन्दोमय्यां' कुसुमाग्रजः ईषद् धिमिधिमि, - अग्निस्वरूपमेव समवकलयति नाम कविरिति 'अद्याऽपि' कवितायां पश्यत। प्रथममेव मीलनम्, किन्तु तदपि 'अकाण्ड एव' गर्भचीनांशुक-क्षणानामपि मीलने पश्यत यद्विद्यत एवास्य ध्येयकवेः कृते, -

सौदामिनीबाणानाम्
आदानं च
प्रदानं च।

महापुरुषविमर्षोऽपि कविकुसुमाग्रजष्वालक्ष्यत एव।

'महापुरुषाणां विद्यते जीवनावसानम्
द्विवारमेव
एकदाऽरिहस्तेन
तदनन्तरञ्च भक्तेभ्यः -'

एवं महापुरुषाः अपि यदा भक्तैः पूज्यन्ते, तदा तेषां पतनमेव जायते इति मार्मिको विचारः कुसुमाग्रजेऽपि दृश्यत एव। एवंविधं शुभ्राश्म-मरणं

नापेक्षते कुसुमाग्रजः, इति कवेः कुसुमाग्रजस्य भावः। इयमेव कुसुमाग्रजानां स्वमुद्दिश्योपयोजिते त्वं-कृते प्रार्थना, यत्सः 'इदमपि शुभ्राश्म-मरणं' नैवापेक्षेत। एवमेव चतुःषु पञ्चाष्वपि वा प्रथम-कवितास्वपि सर्वत्र ध्येयात्मतैव, (ध्येयांश एव वा) वरीवर्तते। सैव ध्येयात्मता सर्वत्र छन्दोमय्यामालक्ष्यते। ... कुसुमाग्रजः आविष्कारवादी (expressionist, but not modern expressionist) कविः। यतः, यदा व्यज्यमानोऽपि भावस्तीव्रो जायेत, तदा व्यञ्जनाऽपि आविष्कृतिस्वरूपमवधारयति। कुसुमाग्रजानामाकलने इयमेव ध्येयप्रवणता व्यञ्जनाशिरस्यधिरुह्योपर्य्युपरि नृत्यते नाम यथा-दिवि। या काऽपि कविता वाचयतु वाचकः, - तस्य कृते ध्येयाभिव्यञ्जनमेव कुसुमाग्रजेषु सुतरां दृश्यते। - पलाशः। 'पलाश' इति नामाऽपि ध्येयमेवाभिव्यनक्ति।

'घनानां पलाशस्य
अस्तोपरि ज्वाला -'

किन्तु मृदुभावनामपहायेदं सर्वं प्रवर्तते कुसुमाग्रजेषु। मृदुरागकवेरपि, - मृदुनिसर्गवकवेरपि विषये ध्येयवादिनोऽपि कुसुमाग्रजस्य नितान्तादरः दरीदृश्यते। पश्यत पलाश एव - यत्

बालकवेः कवनेषु
कश्चिदुदासः पक्षी
पक्षिणोऽपि कण्ठोपरि
श्रावणस्यावलिः
श्रावणस्यावल्याम्
देवायतनशीर्षकलशाः
शीर्षकलशानामुपरि,
... पुनः,
- घनानां पलाशाः।

एवं शृङ्खलासहत्वं यथा-संस्कृते मम्मटानुसारेणैव कुसुमाग्रजेषु लक्ष्यत एव। न जानीमः यत्कुसुमाग्रजाः मम्मटं जानन्ति वा न वा। किन्तु

यन्मम्मटे तन्मम्मटमपि अपठित्वा कुसुमाग्रजाः समुपयोजयन्त्येव महाराष्ट्र्याम्। अद्याऽपि कुसुमाग्रजेषु यद्यपि न ज्वालाङ्गारास्तथाऽपि ज्वाला-स्पर्शो दृश्यत एव। एवं विशाखा-समिधा-काराणामवसानरूपिणी दाहप्रवणताऽप्यद्याऽप्यालक्ष्यत एव।

यत्क्रान्तिसत्यं द्वाचत्वारिंशत् (१९४२) संवत्सरेऽपि कुसुमाग्रजै-रङ्गीकृतम्, तस्यैवावसानप्राणता १९८२ तमेऽपि संवत्सरे विनायासमेव छन्दोमयी सदृशेषु कवितासङ्ग्रहेषु समवलक्ष्यते। यथा केनाऽपि मुष्टि-योद्धृणा वार्द्धक्येऽपि स्वस्य मुष्टियोद्धृत्वं क्वचित् क्वचित् दर्श्यते, तथैव

'ध्येय, प्रेम, आशा यांच्या
भंगणाऱ्या मूर्ती आम्ही पूजितो'

इत्येवंविधोऽयमाशयः स्वस्यैव ध्येयवादमधिकृत्य कुसुमाग्रजः व्यनक्ति नाम। अत एव, - या कुसुमाग्रज-प्रतिभा 'गर्जत जयजयकारं क्रान्त्याः' इति कविता, किं कविता? 'महाकाव्यमेव' तत् - 'कविता-महाकाव्यं' सहस्रेभ्यः, किमुत सहस्त्रेभ्यः, लक्षलक्ष्येभ्योऽपि कोटिभ्योऽपि महाराष्ट्रिजनेभ्यः सम्प्रदाति, तस्या एव ग्रीष्मप्रियतमो 'दात्यूहः' पक्षी, एतस्मिन्नपि ७० तमोऽपि वर्षे जीवनमस्य छन्दोमय्यां कुसुमाग्रजेषु तिष्ठत एव। न तु जीवनमस्य कोटरम्। स्याद्वा ध्येयप्रवणतायाः कृते न कोऽपि स्कोप् (scope), न काऽपि विस्तारक्षमताऽस्मिन् स्वातन्त्र्यपरतरे काले। अत एव 'ईषद्'ध्येयस्पर्शित्वम् कुसुमाग्रजेषु जायतेऽन्तिमासु पञ्चसु षट्सु वा कृतिषु - आरभ्य १९८२ तः, अद्याऽवधिं यावत् 'सारस्वताचे झाड लावीन', १९९३ तम संवत्सरेऽपि कुसुमाग्रजीया प्रतिज्ञा। यदद्य सरलत्वम्, यदद्य दाहदुःखसहत्वं तदेव ध्येयम्। इदं च सर्वमपि लक्ष्यते ८२ तमेऽपि वर्षे लिखितायां छन्दोमय्याम्। यस्याः भव्यता सहजता च द्वावंशौ। अत एवास्माकमद्य १९९७ तमे वर्षे पञ्चाशीति संवत्सरीयकविकुसुमाग्रजेषु ज्ञानपीठविजेतुः (१९८८) कृते कोऽपि विशेषः समादरः। एतस्मादेव च समादारात् लिखितेदं समर्प्यते 'छन्दोमयी'।

२८.५.९७
नागपुरम्

■ **डॉ. प्रकाश पांडे**

शिबिका

चतुर्वाषड्वा कोकिलाः
प्रगे-रक्तं गायन्ति
सुचित्राङ्कितानां स्वराणाम्
एकां शिबिकां निबध्नन्ति ...

मरणस्य सीमोपरि
उच्छृंखलं क्रीडन्तं माम्
शिबिकायां विनिधाय
पृथ्व्युपरि समानयन्ति

□

हार्दम्

सम्बन्धमेनमावयोर्... मा देहि नाम किमपि ।
सर्वेषामप्युडूनां भानं हि नैव जगति ।।

व्यवहारकोविदानां क्रोधोऽस्तु नित्यमेव ।
व्याख्यात एव तेषां प्रज्ञा रयोमयी स्यात् ।।

नो ताल-राग एषां बन्धेषु बद्ध एव ।
स्वरमेलनं सुमञ्जु दशदिक्षु वर्षतीव ।।

पथमेनमाः कथं वा दीपेभ्य एव ज्ञास्ये ।
अवसानमेव येषां नक्षत्रजालमध्ये ।।

□

अद्याऽपि

श्यामलजम्बूरागमयतटिन्याः
आम्रवनच्छाया
प्रथमं प्रथममेव
अकल्पितम्

मीलनं दूरस्थतया
गर्भचीनां शुकक्षणानाम्
सौदामिनी-नाराचानाम्
आदानं प्रदानम्

सुमनोभिः सुश्यामलैः
संकुलं क्षेत्रपरिधितरुजालम्
संचिनोतुमारब्धं श्रावणेन
बर्हिबर्हाणि
आर्द्रनभसोऽधस्तात्
इन्द्रधनोरपि शकलाः
तव च करपाशः
समालिङ्गति जीवनम्

क्वचिद्वालुकानां रथ्याः
क्वचित्सकलिकमुद्यानम्
क्वचित्प्रासादो ऽग्निसात्
कर्पूरक्षोदेन,
सप्तस्वरेष्वितं क्वचित्
मम जीवनस्य गीतम्
तव वीणायाः सह-त्वम्

जातं संगीत-सहत्वम्
प्रालेयरध्येयं शिशिरस्य
इदानीमागामिनि देशे
तवाश्लेषस्य जागर्ति
मधुरिम्णः स्मृतिरद्याऽपि

□

तरुणिमा

एवं हठस्य व्रणाः देयाः
एवं तटस्य स्वीकरणीयाः
ऊषरभाषा रामायणन्तु
रे किमर्थम् किमर्थमेषाम्

स्वप्नानां नव- साक्षात्कृतिरपि
ग्रामपाटलाः क्वचिद्वह्निना
विकसन्त्येतर्हि किमर्थमेवम्
तवोपधाने धूम्रकीर्तनम्

विद्यत एवम् उदयाद्युपरि
यौवनयात्रा लक्ष-श्वोदिन-
व्यथा-त्रिशूलाः उषाऽपि मन्दम्
उरसि विधार्याः जागर्ति खलु

व्रणा ज्वलन्तः कृते तवैव
तेषामुपरि लक्षरवीणाम्
स्मित-पाटलजल गर्भाः सुखेनैव
धारां सिञ्चतु किमिति सहन्ते

□

प्रार्थना

महापुरुषाः यदा म्रियन्ते
तदा
शुभ्राश्मानः (सङ्गमर्मराश्मानः) स्थलशः स्थलशः शतशः
जाग्रति
रथ्यायोगचत्वरशिल्पे
तान्प्रविदलय्य
विनिघ्नन्ति
पुनरप्येकवारम्, ... स्याद्वा नित्यायैव
अत एव -
महापुरुषाणां विद्यते जीवनावसानम्
द्विवारमेव
एकदाऽरिहस्तेन
तदनन्तरञ्च भक्तेभ्यः
इदं शुभ्राश्म-मरणं नापेक्षसे त्वम्,
इयं मेऽस्मिञ्छुभदिवसे ऽन्तरात्मनि
प्रार्थना

□

सूर्यपुत्रः

जनकहीनेषु
सकलेषामप्यनौरसेष्वपत्येषु,
अहमस्मि सर्वातिशायित्वेन तिष्ठन्
तरणिसूनुः
सूर्यश्च पृथिवी चेत्यनयोः
केनाऽप्यज्ञातसंकेतादेव
आकृतिमान्
आम् - स्याद्वाऽसीन्मे जन्म
कस्यचन पुरुषस्य वीर्येण
किन्तु गर्भाशयकृष्णिमनि
यल्लज्जास्पदं सुपतितम्
तदस्तित्वम्
लक्षदलैर्जातमाकृतिमत्
जातमाभामयमपि चाभिरामम्
तत्तु जातमेवं युष्मद्व्यवहरणविपक्षे तिष्ठतः
तरणिराजस्याऽशीर्वचसामेव सामर्थ्येन
अथ च मातुर्धरित्र्याः स्नेहकारणेनैव
अत एव
तानेव नियमान्सम्मानयाम्यहम्
ये समुद्गताः
न जनेभ्यः
न वा जनग्रामेभ्यः
किन्तु भास्वदालोके एव
अथ च सरसरसाया अपि मातृस्नेहे,
आम्, तानेव मानयाम्यहम् ।

□

समन्वेषः

सृष्टशक्त्या अस्याः
अस्मिन्निरन्तभाण्डारे
अहमासमन्विषम्
तव रत्नखचितराजकिरीटम्
सर्वेषामेव चराचरसमुन्मेषाणाम्
विधास्यन्तं विनियमनम्;
मयाऽसीस्त्वमवलोकितः
अथवा नन्वनवलोकितोऽपि;
यदा विलोकितस्तदा
अहमासमेकः संन्यासी
विश्वव्यवहारेभ्यः
सम्प्रमोषित इव,
अथ च यदा नासीस्त्वमवलोकितः, अवभालितः
तदाऽसमहं कश्चित्कठोरः
सकलधूसरोपर्य्येव खड्गाहतिं वितन्वन्
कश्चिद्धननकारी राजपुरुषः
स्वस्यैव कविभावस्य, ... कवित्वस्य

□

यमकावर्षणम्

आतपस्नातेयं विषमोपलग्रामततिः
न स्फोटयित्वाऽपि स्फुटति
स्तनलग्नमर्भकम्

अविश्लिष्टमेव तिष्ठति
कराङ्गुल्याः विनिर्गलद्रुधिरम्
नावसानमायाति

स्त्री स्फोटयन्त्येव तिष्ठति
स्त्री स्फुट्यमानैव तिष्ठति

□

स एव जानातु

त्वष्ट्रा
कर्तितो विवस्वान्
संज्ञायाः सांत्वनकृते
स्वीय-दारुदारण-चक्रोपरि
एकमेव कर्त्तयन्नास्तेऽयं विवस्वान्
कालस्य विषमाग्रच्छुरिकोपरि
अथ च निरस्य तिष्ठति
मम विगणिताञ्छकलान्
सहस्राधिकस्थलोपरि
कोट्यतीतक्षणानामुपरि
क्षणपलैः कर्त्तितोऽहम्
नैकैः स्थलैर्विनिगीलितोऽहम्
संख्यातीतघटनाभिस्त्रोटितोऽहम्
कतिमात्रमस्म्युर्वरितः?
भास्वानेव विजानाति!

□

शब्दः

कोशगतः एक एव शब्दः
'विषण्णम्'
किन्तु न कदाऽपि
मया समुपयोजितः,
एतर्हि सः कोशात्
समवतीर्णः,
अकाण्ड एव मम सदने,
श्वेतकर्बुरोऽस्थिपञ्जरः,
कृष्णातिकृष्णावरणेन
अङ्गानि समावृत्य
श्लथमन्थरं पदानि समर्प्य
निःशब्दतया
प्रसरति सर्वत्र सर्वतः
सर्वव्यापी
यथा द्विषैव भिन्नः

□

विदूरम्

मन्ये
तवेदमपारं दुःखम्
मम कायपाशे
घनीकर्त्तव्यम्
ममोरसि
विनिमीलितव्यम्
किन्तु
मम बाहुपाशेभ्यः
त्वमसि विदूरम्
सहस्र-शपथैः ।

गृध्राः

वियत्
आरक्त --
रूधिरमांसशकलैः
खचितेव --
अथ च
भुवि
तत्रभोऽभिवीक्षमाणाः
एकयैवानिमेषदृशा
गृध्राः --
विनिश्चलाः
असंख्याताः
क्षितिजादेकस्मात्
अन्यत्क्षितिजपर्य्यन्तम् ।

□

चार्वाकः

यदहं भावयामि
तदेव सत्यं नान्यत् --
यन्मां सुखयति
तदेवेषद्वरमेव नान्यत्,
इति ते विनिवेदनम्
'अहम्' एव सार्वभौममिति मन्यमानम्
अहमपि स्वीकरोमि
किन्तु लक्षलक्षैः सम्बन्धैर्
मनुजस्थो 'अहम्' यदा
दशसु दिक्षु विस्तारयति स्वात्मानम्
तदा
स्वीयरथ्या अपि परिवर्तन्ते
यतो 'अहम्' परिवर्तयति स्वात्मानम्
'वयम्' रूपेण

□

ज्योत्स्ना

स्त्री नेति
स्त्री-त्वम्
अथातः
न सा
किन्तु ताः
ताश्च
ताः --

चन्द्रिका मृत्तिकायाम् । चन्द्रिका सलिलेषु ।
चन्द्रिका ऽरण्यगता । विहङ्गम-गानगता ।।
देवायतनशीर्षकलशोपरि । शय्योपरि सुविलीना ।।
एकाकि-मृत्युशय्यायाम् । ज्वालोपरि विनिर्ज्वलन्ती ।।
चन्द्रिका बाष्पपृषत् । चन्द्रिका च हासम् ।
रुदन्त्यपि स्वामि-ता । हसन्ती दास्यभावना ।।

□

दृष्टिः

मार्क्स-रसेलसदृशाः
सकलेऽपि निरीश्वरता-वादिनः
अवसीयन्ते सृष्टिमूलस्रोतसविधे स्थितिमतः
नयस्य निकटे
नाऽस्त्युदयः, न वाऽप्यवसानम्
न रूपम्, न वाऽपि रागः,
न पार्श्वेऽस्य तीरस्य, न वाऽपि परतरम्
एवंविध-वर्तमान-पार्थिव-नय-सविधे
सविधे किलैकस्य स्वयंभुवोऽस्तित्वस्य निःसंज्ञस्य
तर्कस्याऽस्मदीयस्याभिमतमिदम्
किन्तु तथाऽपि मन्ये
यदेभिर्निरीश्वरतावादिभिः
विभावरी-उत्तरयामेषु
न संदृष्टं कदाचनाऽपि
खचितं नक्षत्रैरुडुगणैश्च
अपार-धूसर-समाप्लावितम्
नभो मम दृशा ।

□

रीतिः (रुचिरंक्रीडा)

दीपेऽवलोकित एव
आलोकयाचनम्
पक्षिण्यवलोकित एव
एवंविधा रीतिः - न युक्ता

दीपशिखाः ज्वलन्ति
ममैव कृते
खगाः समुड्डयन्ते
ममैव कृते
एवंविधा भ्रान्तिर् -
असत्यैव ।

□

कानिचन स्फूटानि, कानिचनाऽपि यमकानि

अस्तरवेर्
एकं दलम्
सांध्यघनानाम्
अरण्यमध्ये
ज्वलत्येव।
तस्य तेजसः
गभीरैकता
इह तीरे
अहं जाने
सहस्रलहर्य्यः क्षितिजतः
समागच्छन्ति प्रधाव्य
मुक्तकुन्तलयुताः
अस्मिंश्च वालुकातीरे
ईषद्विलम्ब्य
ईषदवलम्ब्य
ददति माम्
आकाशाशयम् ।

□

मामेकलमवलोक्येह
लहरिषु लहरिषु
ईषन्मसृणवचसाम्
निःस्पन्दमुच्छ्वसनम्
---- आम्, सख्यः
इदं सत्यमेव।

□

दूरसुविदूरं तस्माद्दिनादारभ्य
संप्राप्तोऽहं सविध उदन्वतः
फेनायमानाः सन्ति किन्त्वेतदुदन्वति
तस्य दिवसस्य विधूसरा राश्यः

□

इहान्तर्गभीरे सलिलानाम्
अस्तु ग्रामटिकेन्द्रधनूषाम्
तदनु चोदन्वद्बर्हिबर्हाणाम्
किं न दृश्यन्तु वीजयन्तो व्यजनाः ।

□

इदं पक्षिसदनमथैवंविध एवासीदुपरि
कक्षः कश्चित् ।
एवमेवाऽसीद्रात्रिश्च वात्याव्याकुला
सम्यगार्द्रा ।
एवमेवासमहं कण्ठे समर्पयन्
ज्वलन्तीं धाराम्
तज्जलेन न त्वद्यान्विष्टम्
सागरतीरम् - ।
- मन्ये, कश्चिन्मुग्धोऽहम्
अपार-भीषण-अभावेभ्यः
सम्प्रधावन्नेव समायामि,
भीष्ण-मृतसविध नैःशब्द्यादेव
अन्विष्यामि शद्वयुगुलं तत्,
एतर्हि मा, ... मैतर्हि ... ।

□

विहाय

यदा धराया विहायसा विश्लेषः
कुह गन्तव्यं नाम तेन विहायसा
तवैव सदने कृते वत्सलस्य
समुपविष्टस्य हृत्, ... सांत्वनम्

अभिज्ञातैवासीत्कथा त्वया
संप्रदत्ताश्चासंस्त्वया संकेताः
तदानीं च जाते ससलिले
तव बाष्पपरिप्लुते नयने

विनैव वाचमिममनुभावम्
उरसि समाकर्षयसि किम्?
अस्यावसानज्वलनस्य कृते
उपधानं किं पाटीरसमचन्द्रमसि?

□

अविज्ञातः

कदाचन किमपि यान्त्रिकतया
जनेषु मम नाम कथयाम्यहम्
विद्यते सन्दर्भाणां किन्तु -
नाहं नाम विद्ये तत्र कुत्राऽपि
घटिकायामेवंविधायामेतावद्विनिर्गच्छामि
सुविदूरमहं परितोऽन्तर्
यद्विशेषणानामथ च क्रियापदानाम्
कवचेभ्यो विनिःस्खलति जीवनम्
विद्ये ऽहमेकलो घनेऽवकाशे सुविलीनः
एकाकित्वे नितरां विहरन्स्तरङ्गायमाणे
विना ऽर्थमथवाऽप्यपारतायाः
मां वाहयति वातोऽविक्षुब्धः, ... प्रशान्तः ।

नित्यकृते ऽपि जायेऽहमविज्ञातः
हार्दं च साम्बन्धिकं सहवासजं त्रुटति ।
मन्थरं प्रवहति स्वप्नो निरामयः
यत्र जानामि कस्य किल नेत्रेऽपि ।

एवंविध-प्रवासे ऽस्मिन्कदाचन
बृहदश्मशिखर्य्यश्मनि संपतामि
बिन्दूत्क्षेपञ्च विनिपीय जीवनस्य
भूयोऽपि बलादेव धरायां विनिपतामि

□

प्रवासि-विहगाः

अन्धतमिस्त्रात्
अवकाशात्
समुड्डयन्त आसन्
कतिचन विहङ्गमाः!
श्रावणार्द्रे
वातावरणे
निःसरति स्म
श्वेतरङ्गावलि-रेखाणाम्
चित्रमाला ।

ममावकाशः
ममान्धकारः
एतयोरपारम्
विनिर्भिन्दन्ति
पक्षिणोऽन्तरम्
जीवनस्य
निःस्खलन्ती
प्रखरविनिद्रा
अजीवोपरि
खनन्त्येव
निःशब्दे किल
प्रवलयन्ति शुभ्राणि
नौकायानानि
शुभ्रवातकर्पटानि
न केवलमहम्
पृथ्व्यप्यखिला
पश्यन्त्यासीत्
तानभ्यनिशम्

श्रुतमस्ति किल
प्रवसन्ति सततम्
दिवानिशं नाम
योजनसहस्राणि ।
शिखरेभ्यो दरीभ्यः
तटिनीभ्यः समुद्रेभ्यः
नगरेभ्योऽरण्येभ्यः
एतेषां परतरम्
सन्ति समायाताः
साक्षाददृश्यात्
विनिर्यास्यन्ति
अदृश्ये किल ।

अनन्तस्य
मूकर्षयः
ईषद्विहस्य
स्थितास्तमिस्त्रे
विनैव गीतिम्
विना सङ्गतिम्
'गभीर'-मध्ये
गतिरूर्वरिता
उरसि विनैव
किमपि कारणम्
भरितो भावः
विना कारणम्
पक्ष्माऽपि सुतराम्
आर्द्रं जातम् ।

□

अस्तपरस्तात्

जानाम्यहमस्तसमये
अस्य नभसः सत्त्वमखिलम्
अस्तमेति सहसूर्यम् ।
जानामि यद्धूसरोपरि
वहन्ति विहायसः सान्ध्यसमये
तानि सन्ति बाष्पाणि नभसः ।

घनतरुतले
याश्छायाः कम्पन्ते, नभसस्तानि
भीःकम्पनानि ।
वात्याः कुर्वन्ति सलिलोपरि
अस्या गुहायाः भीष्णनादान्
ते सन्ति स्फुन्दनान्यालापाश्च ।

जानाम्यहमस्मिन्मध्ययामे निशायाः
तां सम्पदं याऽन्धकारोपरि
प्रकटयति स्वामनिशम् ।
अस्य नभसोऽस्य तमसः
तत् साकमालोकेन श्वोदिवसस्य
एकमस्ति दुर्दान्तम्, ... हस्तान्दोलनम् ।।

□

भावगीतम्

सान्ध्यच्छायास्वेकम्
मुषितमिव भावगीतम् ।
अन्विष्यामि घने घने
स्वरानहं ये तस्मिन् ।।

तत्सुस्वरसौहार्दे
उषसाऽपि पक्षौ समवाप्तौ ।
दाहैरपि जातमवश्लथमलिनम्
प्रज्वलदातपे ।।

सांत्वनानि रक्षणान्यपि
प्रोन्मीलितानि स्वरेषु तेषु ।
तदेव सम्प्र जागर्य गीतम्
दीपा अन्तरि-स्थाः ।।

अस्यां रिक्ततायां यामिनी
समायाता घनान्धा परितः ।
हृदि स्पन्दमाने पृषन्ति पृषन्त्यपि
घनीभवन्ति तमसोऽन्तरि ।।

□

पलाशः

घनानां पलाशस्य
अस्तोपरि ज्वालाः
अस्तस्याऽपि कण्ठे
मौक्तिकानां माला ।

मौक्तिकानां मालायाः
कुङ्कुमारुण - जलम्
कुङ्कुमारुण - सलिलोपरि
बालकवेः कवनम् ।

बालकवेः कवनेषु
कश्चिदुदासः पक्षी
पक्षिणोऽपि कण्ठोपरि
श्रावणस्याऽवलिः ।

श्रावणस्यावल्याम्
देवायतनशीर्षकलशाः
शीर्षकलशानामुपरि पुनर्
घनानां पलाशाः ।

□

प्रेम नाम

अलं चन्द्रमोभिरलं च सवितृभिः
अलं तारकाभि
रलं तटिनी निर्झरै
रलं नाम च समीरणैः
बर्हीव भव समुच्छ्रः समीरणपूरितोरः
ज्वालेवाङ्गारस्य दृष्ट्यां दृष्टिं बद्धा तिष्ठ सुतराम्
कथय तां तस्याः समाश्लेषे
सकलमपि यत स्वर्गीयम्
शैवलमयाः शब्दा अथ च
यमकछन्दोभिः किं करणीयम्?
राल (tar) रथ्योपरि किं श्रावणमासः
इन्द्रधनुषं बद्धुं शक्ष्येत नाम किम्?
ग्रीष्मघन इव स्थास्यति वातावरणेऽप्यटन्
द्वादशमासान्यावद्विरहरणरणकयुता जायेत स्त्री ते
तदनन्तरं किं न समवाप्स्यसे त्वम्,
समुद्वाह - चिट्ठिकाम्?
अत एव कथयामि जागृहि
यावत्र भवेत्कालो विनिःसृतः
न प्रेमाक्षराणाम् बालिकानां क्रीडा
प्रेम नाम वात्याज्वालाभावेन परिणमनम्, तदनु प्रज्वालनम्
प्रेम नाम शुष्कारण्यीभूय स्वस्मिन्ज्वलनम्
प्रेम कुरु यथा भीम-भिल्लः बाणोपरि न्युप्तम्
मृत्तिकायां समुदीयाऽपि घनं यावत्प्राप्तम्
शब्दानामेतस्मिन्नीहारे मा भूर्बद्धः
विकिर महावात्यामिमां सकलामवकाशे
या नाम हृदन्तरे सुविराजमाना
कुरु प्रीतिं भिल्लसमाम्
बाणोपर्य्यन्तर्न्युप्ताम्

□

हताशम्

अस्य कायस्य दानप्रत्यर्पणपूर्तिः
कतितरां भवितव्येति न समाकलयामि
रक्त-काषायदाहान्प्रज्वाल्य
इदं विग्रहयुनत्वमद्याऽपि प्रज्वलत्येव

स्फुटन्त्यद्याऽपि ते शीतांशु-घनाः शतशः
संज्ञायां वर्षन्ति प्रज्वलत्तुषाः सहस्रशः
अद्यापि पोताः रक्त-समीरणकर्पटयुताः
अन्विष्यन्तः स्पर्शतीरानटन्त्येव

विनिःस्खलति लौकिकं सञ्चितम्
तृणोपरिस्ताच्च माला नीहारवती
कथं योद्धव्यं साकं नियत्या न जाने
इह निश्चितिरेव विद्यते पराभूतेर्नित्यम्

अस्यामपारकर्दमभूम्यां मे
हताश-दौर्बल्यमृतरथ्यागमनजर्जरं जायते
धरित्र्याश्च पुरन्ध्र्या इव मृत्तिकया
स्वीयसम्बन्धं त्रुटितं योजयदास्ते पुनरपि

रे (स्तोत्रम्)

प्रकाशदातर्
जीवनदातर्
उदयाद्रौ त्वम्, समायाहि रे!

विश्वसुममिदम्
मुग्धमचेतनम्
दलेषु शतशः फुल्लय रे!

निराकारगत
चराचराद्रौ
सुवर्णरेखां योजय रे!

नीरवतायाः
मरुभुवि सततम्
स्वरसौधानपि बन्धय रे!

अवकाशीये
भ्रान्तघने खलु
जीवनाशयं सिञ्चय रे!

रसोपरिस्थे
रिक्तचेतसि
तवालोकपदमर्पय रे!

□

ह्रदः

कदाचनैको विधुः
राजहंसपक्षयुतः
क्षपाचेतसि समुन्मीलितः
कश्चिद्राजीवमिवाभासः ।

कदाचिदेकमिन्द्रधनुः
वर्षाश्यामलस्तनोपरि तः
वासनेव समाप्लवमाप्तवान् ।

कश्चिद्रागविलासः
घनानां भस्मेनावलिप्य स्वम्
तपाचरणे स्थितिमत्
विराड्मौन इव मुषितः
नामैकोऽवकाशः ।

क्वचिदेको ज्वालाङ्गारः
तीर एव ज्वालामयः
पृथिव्या अशान्त-हृत्-तः
सागरसमाप्लाव इव संप्रसरन् ।

कदाचिदेकं कपोतकम्
कदाचिदेकः कोकिलः
कदाचिदेकस्य मृगस्याऽपि
विग्रहे लग्नेव तृष्णा ।

एवंविधं किमपि किमपि
आसीत्सञ्चितं ह्रदे किल
इदानीं ग्रीष्मोऽपि सं प्रार्थयति
अस्य सकलस्य किल दानम् ।

□

स्थितिमत्

अस्यां प्रभञ्जनवेलायाम् रे मम राजस-पक्षिवर !
रक्षयित्वा ऽधारं तिष्ठ धीरात्मतायाः ।

स्फुटितं नभ उपरिस्तात् घनोपरि पतन्ति घनाः
तेषां क्षतग्रस्तगर्जनं नदत्येव ।

विद्युन्नदति प्रमुग्धा पतति धारा यथा शूलः ।
शाखायां शाखायां तमः समवलम्बमानम् ।

पक्षाणां हम्र्योपरि तव वर्द्धितं जीवनम्
सुमपरागानां गानं पक्षोपरि ।

खगानामरिभावसमयः व्यपयातु नभसि समाप्लुत्य ।
अधः क्षितिजस्यातपं स्थितिमत् ।

□

आनन्दलोकः

ममानन्दलोके
न शीतांशुरायात्यस्तम्
उदन्वान्गभीरः प्रेम्णः
नापेक्षते प्रभञ्जनम् ।

ममानन्दलोके
बद्धं वसन्तेन गेहम्
आम्र-आम्र-शाखोपरि
स्फुटति कोकिलस्य स्वरः ।

सप्त-रागानां सन्देहः
वहतीह वातावरणे
इह मरणमपि नृत्यति
बर्हि-बर्हिणा स्वमाच्छाद्य ।

कणिका-द्वयम्

तव नेत्रयोर्मध्ये
अमावस्या
'आवस'- रात्रिः
पक्ष्मपंक्तिमध्ये
गभीरायिता
तत्र विना प्रदीपम्
मया भ्रान्तेन भ्रमितम्
अवसाने समायातम्
सलिलसविधे ।
आम्रोपरिस्थं कोकिलगानम्
प्रभातशय्यायामवतीर्णम्
हिमोपरि समारोप्यानङ्गमित्रम्
चेतसि भ्रमितम् ।
काय-गत-स्थली-स्थली-मध्ये
विधुदीपावलिं प्रज्वाल्य
पक्षोपरि समासाद्याऽरुणोदयम्
भूयः शाखायां रसालस्य
तैरितं स्थितिमितञ्च ।

□

ऋणम्

मृत्तिकात्त्वम्
न विनिमीलति न विनिमीलति
विहायस्त्वम्
न परापतति न परापतति;
विहायो-मृत्तिकयोरस्मिन्संघर्षे
मम व्रणानां ऋणमिदम्
न पूर्तिं याति कदाऽपि नाम

□

कपटम्

सायं नीहारे नीहारे
सह-सलिलपात्रा त्वं कटिपार्श्वे
भाले कुङ्कुमं भरित्वाऽकाण्डे
त्वमिता

समुत्प्रेक्ष्य समुत्प्रेक्ष्य
मम शैवलयुताभ्यां जातं नयनाभ्याम्
भीर्ग्रस्तपदं वलयामि स्वात्मानम्
नदीमपि

तत्र ज्ञातं तव कपटम्
घटः पतति सोपानोपरि
रेखाः कुङ्कुमस्य चतुस्
सलिलोपरि !

□

प्रेमयोगः

प्रेम — कस्योपरि कर्तव्यम् ?
यस्यकस्याऽप्युपरि कर्तव्यम् ।

प्रेम — राधिकाया वत्सल-स्तनोपरि कर्तव्यम्
कुब्जाया विरुपविशङ्कटविग्रहपृष्ठवंशोपरि कर्तव्यम्,
भीष्मद्रोणयोः श्रान्तयोस्
तीर्थस्वरूपचरणयोः कर्तव्यम्,
दुर्योधन-कर्णयोरभिमानि-
अपराजित-मरणोपरि कर्तव्यम्,
प्रेम यस्यकस्याऽप्युपरि कर्तव्यम् ।

प्रेम — सुदाम-नामक-भट्टोपरि कर्तव्यम्
अर्जुन-नामकस्य-राज्ञ उपरि कर्तव्यम्
वंशीतः स्यन्दमानानाम्
सप्तस्वराणां चन्द्रिकाया उपरि कर्तव्यम्
कालिन्दीह्रदं विषमयं कुर्वतः
कालिय-सर्पस्य फणोपरि कर्तव्यम्
प्रेम यस्य कस्याऽप्युपरि कर्तव्यम् ।

प्रेम — रुक्मिण्या अरुणाधरोष्ठयोरुपरि कर्तव्यम्
वक्रतुण्डस्य हास्यास्पद-उदरोपरि कर्तव्यम्
धेनोर्नेत्रयोर्
गभीर-कारुण्योपरि कर्तव्यम्,
बर्हिबर्हिणः
अद्भुतलावण्यस्योपरि कर्तव्यम्

प्रेम — हार्दसम्बन्धोपरिकर्तव्यम्
अथ च खड्गधारोपरि कर्तव्यम्,
प्रेम यस्यकस्याऽप्युपरि कर्तव्यम् ।

प्रेम — गोपीनामुन्मादकलीलोपरि कर्तव्यम्
कृष्णमित्रविदूषकस्य मुग्धवचसामुपरि कर्तव्यम्,
यशोदायाः दुग्धोपरि -
देवक्याः बाष्पोपरि -
प्रेम बलरामस्य स्कन्धोपरिस्थ
हलफालोपरि कर्तव्यम्,
कंसस्याऽपि स्पन्दमानहृद्गत -
द्वेषवन्हेरुपरि कर्तव्यम्,
यस्तारणीयः
न केवलं तदुपरि
अपि तु यो मारणीय
स्तस्याऽप्युपरि कर्तव्यम्,
प्रेम यस्यकस्याऽप्युपरि कर्तव्यम् ।
प्रेम — योगोपरि कर्तव्यम्
भोगोपरि करणीयम्
ततोऽप्यधिकतरम्
त्यागोपरि करणीयम्
प्रेम — चतुर्णामपि पुरुषार्थानामुन्मादं ददतः
जीवनस्य द्रवोपरि कर्तव्यम्,
अथ च व्याधशरक्षतस्य
अरण्य एकाकित्वेन स्थिते
स्वस्यैव शवोपरि करणीयम् ।
यतः - प्रेमाऽस्ति मनुजस्य संस्कृतेः सारम्
तस्येतिहासस्य निष्कर्षः
अथ च भविष्यत्कालीयस्य
तस्याऽभ्युदयस्याऽप्याशा
एकैव केवला !

□

मर्यादा

राजानो मुषिताः
राज्ञ्योऽपि मोषमिताः
तेषाञ्च प्रधानसेवकविदूषकैरपीतम्
तानि भेरीवाद्यानि
ताश्च शिबिकाः
कटितो द्विधाभूतविग्रहस्य नमनानि
दृष्टि-पात्रेषु लग्नानि
अतिभृत्यभावस्य तन्तुवायगेहानि,
निखिलमपि संप्लावितमस्ति,
लोक-राज्य-प्रवाहे ।

या विद्यते लिंकन-वचनानुसारेण
जनानाम्, जनानां कृते, जनैश्चेत्यादि
नूत्नभानानामिमाम्
वरुथिनीं सहावलम्ब्य
यदाऽहमन्वेष्टुमारभे
रथ्यागतावलम्बमानकर्पटेषु
(अथ चानाथालयस्य नेत्रवतः टेरिलीन-बुशशर्टेऽपि)
शिखरिप्रस्थोपरि विहतालोकसम्मानः
ततश्च परावर्तमानो नयालोकः ।

अतस्तत्सकलमपि मोषमितं विश्वम्
नादयित्वा तूर्णभेर्य्यादयः, शिबिकाः समुन्मेष्य
चतुर्भिराशाभिरपि अस्मत्परितो वरूथिनीवत्तिष्ठति
अथ च स्वीयैतिहासिकं चीनांशुकशस्यं वितन्वत्,
मामुद्गिरति : सुष्ठु, सुष्ठु, - किन्तु रथ्याभ्रंशकृतेऽपि
काऽपि तिष्ठति मर्यादैव, यस्याः परस्तात्र गन्तव्यम् ।

□

जानाम्यहम्

जानाम्यहम्
तव सन्दर्भं स्तनयोर्
ग्रहनक्षत्राणाम्
(पैतृकसम्पदियम्), दानमिदम्
ग्रहतारकाणाम्
किन्तु परस्तात्
पृथ्व्युपरि घटति
किमपि
विनिर्मित्याः पृष्ठे
मानवस्य चेतः
विश्वेऽपि समम्
नास्त्येव यस्य
त्वचः पार्श्वे चेतः
चेतसि च भावः
तस्य किञ्चित्कलनम्
अन्विष्याम्यहम्

□

स्पर्शः

स्पर्शादयि तवारण्यानि यान्ति समुदयं क्वचित् क्वचित्
यतो घनीभूताः समुन्मिषन्ति हरिता घनान्धाः शर्वर्य्यः ।।
कुहरेषु श्वापदानां तव हिंस्राः सञ्चारा नाम
विकरालच्छायानां समान्दोलने समाप्लावा इव समुद्वाहयात्राः ।।

सकलान्यपि भानानि समाप्नुवन्ति रूपमादिवासि
उन्मेषाश्च संस्कृतीनां सकला अपि विनिर्गलन्ति ।।

कृष्णिमनि निशातमिस्रञ्च घनीभवति जीवनगर्भाशये ।
मृत्तिकायां मांसलस्यां विशीर्णा जायन्ते सर्वेऽपि सम्बन्धाः ।।

स्पर्शे तस्मिन्नेव कदाऽपि फुल्लन्ति सरांस्यपि ।
ताराङ्गणानि पूर्णचन्द्रविभावर्य्याः यस्य सलिलेषु स्नान्ति ।।

लहर्य्यो नीलकृष्णाः सहस्रशः करुणार्तसांत्वनानाम् ।
अस्वस्थं तीरमिदं गृह्णन्त्यपूर्णकुक्षौ स्वीयायाम् ।।

□

नदीगतं सलिलम्

नदीसलिलं चन्द्रिकायामपि
नेदानीमपि दोलायते सहलहरीकम् ।।
मधुन्यपि हरित-चम्पकः
एतर्हि नैव समुल्लसति ।।
पदरथ्या इमाश्चौरपदाः उच्चैर्गच्छन्ति शिलाहर्म्ये ।
कुत्र यातव्यमित्यज्ञात्वा यान्त्येव पुरस्तात्
बर्हिबर्हाणां स्वप्नं तु तेऽपि
नेदानीमन्वेष्टुं यशोभाजः ।।
पुराशिवालयं हठेनैव जीवति तथैव
प्रासादशीर्षार्धगोलतश्च वातः प्रवहति,
वातः प्रवहति
अस्तस्यास्य त्विन्द्रजालम्
नेह समवतरति, नेह पदमपि ददाति ।।
तीरे परस्मिन्घनच्छाया आतपे किलाम्रवने
उच्छ्वसिति मन्दसौरभो वृन्ताद्वृन्तादुल्लासेभ्यः
स्तब्धास्तिष्ठन्ति पिकास्तत्र
न वर्षन्ति खलु कूजनमपि ।।

□

घनः

न नामाऽप्यस्ति घनस्य किञ्चित्
न वा ग्रामो न वा स्थानम्
अनन्त-गगने वहत्येव स्वरः
स्वरगङ्गानामेक एव दीप्तस्वरः
दिशो रथ्याभ्रष्टाः यथा पथिकस्य
यः कश्चिच्छ्रान्तश्चलति क्वचित्, क्वचिच्च स्थितिं प्रयाति
समाश्लिष्य स्वप्नं कदाचन
उपधानमिति क्षितिजं गृहीत्वा पतति धरायाम्
अरुणपरागं कुङ्कुमं चावलिप्य क्वचित्
फुल्लति, मरु भुवः प्रस्थे सुतिष्ठति
क्वचिद्व्यथाया गृह्य भल्लकम्
रूपं समाप्नोति भीष्णजम्बूरागम्
बलीवर्द इव क्वचित्प्रमुग्धः
विनिःशेषं प्रपलायते पीत्वा महावातम्
शैलशिखामेव मत्वेशं भवम्
कुरुते निजकायस्यैव देवालयम्
रहस्यमिदं प्रश्नोऽप्येवंविधोऽयमुन्मत्तमुक्तः
किं नाम गर्जितेभ्यः सम्प्रज्वलति
फुल्लति किमथो मनोगतं किं नाम
पृथ्व्युपरि न जानाति कश्चनाऽपि
अतर्क्य एवंविधः किन्तु कदाचित्
यदा समर्पयति द्रवमिव स्वात्मानं भुवि
एकमेवाभिजानामि यत्समर्पणादस्माद्यत्
नासीदियं यात्रा क्वचित्निरर्थके !

□

धरित्र्योक्तम्

मृत्तिकामिमां वदति धरा - तव शीर्षोपरि
ग्रहैः सप्तभिरपि धर्तव्यश्छत्रश्चामरयुतः
राजसदनस्य बन्धान्वित्रोटय कश्चिन्नृपालननन्दनः
दीपायमानो ज्वलति, गभीरतिमिरात्
कृत्वा रोपणं भुव्यस्याः करुणागीतेः
तस्याश्च करुणायाः परागाः सुरभयो वितन्वन्ति परिमलमन्तरि ।

गृह्य मरणं स्कन्धोपरि कश्चिदेकश्चरति
येन पतितानां बाष्पेषु समासादितः परमेशः
द्विधाभिन्नोदेहः क्रूसोपरि तर्ह्यपि तेन संप्राप्तं नक्षत्रपदम्
तस्यैवरुधिरस्य पृषन्ति जातानि भालोपरि दिव्य मौक्तिकततिः ।

कोटिजनानां दरिद्रतायाः समाप्नोति कश्चिद्ध्येयम्
स्मितेषु तस्य समाप्नोति हुतात्मनः मुक्तेराश्वासम्
द्वेषवह्न्युपरि परापातितः सः यथा घनोऽपि ग्रीष्मोपरि
प्रेमसमर्पितस्य तस्योच्छ्वासस्य तृणोपरि मञ्जरी ।

कैश्चिदर्पितः कायः बलोद्धतरथ्याधःस्तात्
कैश्चिद्दत्ताः सर्वाहुतयः केषाञ्चन बाष्पकृते
देवत्वनिकटे समायाति निर्गच्छतीव पार्थिव-मृत्तिका
चरणचिह्नानामेवंविधतारका अगणिताः मृत्तिकाया उपरि ।

सप्तग्रहैः शीर्षोपर्य्यस्या धर्तव्यं छत्रमपि चामरयुतम् !

□

दृप्तसम्राजः

दृप्तसम्राजः
काचहर्म्याणि
सत्ता-सम्पदुन्माद-
समाप्लावितानि,
ददति जन्म
असाधारणानामाविर्भावेषु
अमानुष-बलात्कृतीः;
किन्तु तावदेव,
यावत्सामान्यमनुजः
रथ्यागतः
जाङ्गलगतः
क्षेत्रस्थः, कारक्ष-गतः,
नोत्थाय ज्वालायां परिणमय्य स्वात्मानम्
अथ च नो विदधाति चूर्णम्
अश्मानो वर्षयित्वा
तस्य काच-हर्म्यणः
संस्कृतेर्व्यवहरणे
अयमेकः समुच्छ्वासो यः शान्तयति
यत्साधारणो मनुजः
न कदाऽपि म्रियते
नितरामाहतोऽपि ।

तात्पर्यम्

स्तेनभालोपरि
वेश्यास्तनोपरि
भुजङ्ग-करदण्डोपरि
कदाचन
मया वाचिताः शिलालेखाः
निस्तुल-महात्मतायाः,
अथ च कदाचिद्वाचिताः
सज्जनानां स्मितेषु
साधूनां साधुजनानाञ्च वसनावरणेषु
सचिवानां शासनकर्गजेषु
अतिनूत्नदेशाः
वेश्या-व्यवहाराणाम्
भुजङ्गव्यवहाराणाम्
स्तेनवदाचरणानां च
तात्पर्यम्
यद्यपि संज्ञाः स्थिरा एव
तथाऽपि प्रवृत्तयो रयस्वत्यः प्रवाहिण्यश्चैव !!

मूल्यम्

सप्तमे स्तरे हर्म्यणोऽस्माभिः
हिमविनिवेश [१] मध्ये रक्षितानि
सुन्दराणि श्रीमन्ति मूल्यानि फलरूपेण
हिमयुतशर्करायां सुलिप्तानि यानि
तान्यपि सकलानि महान्त्येव

किन्तु -
एकमस्ति मूल्यमेतावत्
यद्रथ्योपरि चरति
रथ्योषरेषु भुनक्ति
शीतवातादिषु म्रियते नाम
इदमेव मूल्यम्
चेतसि मम निलीय स्वात्मानम्
चरति सार्वभौमम्
यथा-घनम् !

१ - हिमपेटिका (refrigerator)

□

सम्मर्दः कच्चित्

महापूरस्य भयावहासुरसमाप्लावगता
प्रत्येका पृषद्यदि सारिता तथाऽपि
तथाऽपि सा तृणपर्णोपरि
कदाचित्किल थरथरायमाणाऽसीत्कच्चित्

महाप्रभञ्जनभीष्णताण्डवस्याऽपि
यद्यालोकविस्तरो ऽपाकृतः स्यात्
तथाऽपि स एव पाटलदलेषु
कदाचन नूपुर इव नृत्यन्नासीत्किल

सुनिर्दयक्रोधेन, सुतरामामर्षेण धावति जनसम्मर्दे
सोऽपि करुणामृणालबन्धे
कदाचित्स्याद्वा बद्ध एवासीत्

□

गगन हे

गगन हे त्वं मम ग्रामे
अथ तस्या अपि ग्रामे
उदार हे, जानासि त्वम्
निखिलमपि कथाभागम्

एवंविधं दूरत्वं यद्यपारं जायते
एकमेव तवैव नीलाकाशत्वम्
अंतर्य्यपि एकत्वस्य
सांत्वनं नियतमेव जीवयति

घनकेशेषु तस्या हे अनन्त
न्यस्य करं बह्वनरालम्
कथय तामपि यत्सुविदूरं तत्रापि
घनत्वमुपैता किल विभावरी

□

योगिनी

यदाऽव्हयिष्यसि
तदैवायास्यामि
यावत्प्रार्थयसि, - प्रार्थयिष्यसि
तावदेव दास्यामि ...

दानाऽनन्तरम्
कायं विहाय
तिष्ठन्तीव छाया
विनिर्यास्यामि

तव किरीटम्
न याचिष्ये
सभायां स्तब्धत्वम्
न कथयिष्यामि

मयि तिष्ठति
त्वम् - भावे
योगिनीरूपेण
परिणमिष्ये

□

कति नाम

संगीतसभावसाने
समुच्छ्रैव कोणाटके वीणा
रज्जुषु तथाऽपि मन्थरम्
गीतं विनिर्झरति ।

कति नामेयं रागासक्तिः
अस्तित्वसीमायाम्
निष्पक्ष-लालसायाः
बर्हिणः केकाश्चरन्त्यवकाशे ।

□

आदर्शः

आदर्शाः नैव वितन्वन्ति
कमनीयमभिरामं रूपम्
किन्त्वयं दर्पणः
अन्य एव

केशेषु यदा तया सुमनांस्यर्पितानि, न्युप्तानि
तदा तयाऽस्मिन्नवलोकितमासीत्,
अनिर्वचनीय इवास्मिन्
आदर्शे
नियत-वेलायाम्
चित्रपरिगतकाष्ठादीन्येव परिसमर्प्य

तदेव रूपं स्वं सा प्रकटयति

□

चटकी

शाखोपरि चटकी
कर्बुरश्वेता
चिव्चिव् करोति -
पश्यति मामपि
नभो विलोकयति
चिव्चिव् कुरुते -
शाखोपरि चटकी
कर्बुरशुभ्रा
रुमझुम नृत्यति
चेतः समाह्लादयति -
आगमनं निर्गमनं चटक्याः
विद्यते विहायसि
अतः सा भृशमपि
भृशं जानाति नाम

□

मीलनाय

मीलनकृते ते
सर्वमपि सिद्धम्
मृत्तिकोपकारा
स्त्रोटिता मया ।।
अर्हता-दर्पणाः
आर्तं सौहृदस्य
पुराण-आपणे
एतेऽपि विक्रीताः ।।
लक्षसम्बन्धानाम्
खनिता हि गर्ताः
समुद्भवस्तनौका
धरोपरि ।।
क्रयादि-गणितम्
सलिलेषु नीतम्
गाने तु स्थापितम्
किञ्चिन्निरीक्षणम् ।।
स्वल्पमेवादानम्
अपारं तु दानम्
निर्लज्जीभूया ऽहम्
दरिद्रतायामितः ।।
धनविनाशस्य
कायलीलादीपः
तेजसोऽल्पं तिर्यक्
किरणास्तित्वम् ।।
शीतांशोः शारदम्
भानोश्च दहनम्
कृतं विसर्जनमेतयोः
नभोमध्ये ।।
आकाशगङ्गायाम्
पृथ्व्युपरि कु-स्त्री
स्नानायेता धरा
पुनरप्यानीता ।।
आयुषोऽपि कूटे
कृतं मया युद्धम्
तस्याऽपि संकीर्णम्
कच्चरादिष्वस्तम् ।।
कायस्य प्रासादाः
चेतो गोपुराणि
रक्त-कारासद्म
व्यापाराणाम् ।।
तेषामपि द्वारि
परित्यक्तं पदम्
नाम सस्थासकम्
सन्धौ विलिखितम् ।।
वर्षाघन इव
सम्पूर्णतयाऽपि
जातोऽस्म्यहं रिक्तः
स्थितिमितः ।।
बिस्मिल्ला-स्य केचित्
तूर्णभेरीस्वराः ।
श्रुतिकुक्षावायान्तु
इत्येवं याचे ।।

□

अव्यक्तादीनि

इमानि तमोऽर्णवानां पोतानि
जातानि सागरतीरस्थनगरस्याऽश्रितानि
लक्ष दीपानां प्रकाशितानि अत्र ससलिलनिःस्यन्दीनि ।।

तेषां पोतानां नाविकाः
समायाता अस्मिंस्तीरे
रससौरभानां रूपनगरी स्थले स्थले प्रकटिता ।।

दृष्टिर्जाता प्रेक्षामयी
श्रुत्या लब्धं गीतमपि
कामनावासनानां कन्दैः संज्ञोपरि समुल्लसितम् ।।

इयं दीपपात्री मृत्तिकायाः
प्रज्वालिता दीपशिखाऽहंभावस्य
समुज्ज्वला प्रकटिता प्राचीं यथा भास्वदुदये ।।

अस्यास्तीरस्थनगर्याः कृपाप्रभावात्
अभावोऽपि जायते सुतरामस्तित्वम्
मृत्तिका ऽपि समाप्नोति महिमानम् विश्वात्मकस्य ।।

समाप्लावा इन्द्रधनुषां कल्लोलायन्ते
विद्युतां प्र जाङ्गलानि विनिर्ज्वलन्ति
पलान्यपि न तिष्ठन्ति रिक्तानि एवंविधमिदं सकलं नाम ।।

नौवसनानि भूयोऽपि सवातानि यदा,
यदा च तमोऽर्णवेषु प्रवसन्ति
अस्या उदन्वत्तीरस्थनगर्या वत्सलता विराजिष्येतान्तरि ।।

□

ईषच्चिन्ताकुलतयैव

इह पतिताः सन्त्याप्लाविताः साक्रेतिसः
अङ्गारा विषचषकगताः ।।
गौतम-गान्धिनां नेत्राणाम्
करुणबाष्पाणि सिञ्चितानि ।।
रुधिरं शूलेनैवास्यां धरायाम्
येशोः समर्पितम् ।।
अस्यां पल्वलमृत्तिकायां प्रवासि रे !!
ईषच्चिन्ताकुलतयैवार्पय मन्दं पदानि ।।

□